## हस्तौ

वाम हस्तः।          दक्षिण हस्तः।          अङ्गुली।

राम ! उत्तिष्ठ। तव हस्तौ दर्शय। त्वं केन हस्तेन लिखसि? आर्य ! अहम् अनेन हस्तेन लिखामि। स दक्षिण हस्तः। अन्यः वामहस्तः। एकस्मिन् हस्ते पञ्च अङ्गुल्यः सन्ति। द्वयोः हस्तयोः दशाङ्गुल्यः सन्ति। पाणौ विविधाः रेखाः विद्यन्ते॥

रामः उपविशतु। कृष्णः उत्तिष्ठतु। कृष्ण ! त्वं हस्ताभ्यां नेत्रे स्पृश। वयं नेत्राभ्यां किं कुर्मः ? वयं नेत्राभ्यां पश्यामः। हस्ताभ्यां कर्माणि कुर्मः। अन्येषां प्राणिनां द्वे नेत्रे विद्येते; हस्तौ न स्तः॥

क) प्रश्नाः --

१। एकस्मिन् हस्ते कति अङ्गुल्यः सन्ति ?

एकस्मिन् हस्ते पञ्च अङ्गुल्यः सन्ति।

२। द्वयोः हस्तयोः कति अङ्गुल्यः सन्ति ?

द्वयोः हस्तयोः दश अङ्गुल्यः सन्ति।

३। कुत्र विविधाः रेखाः विद्यन्ते ?

पाणौ विव्धाः रेखाः विद्यन्ते।

४।   हस्ताभ्यां किं कुर्मः ?

हस्ताभ्यां कर्माणि कुर्मः।

५।   द्वे नेत्रे विद्येते , हस्तौ न स्तः , केषाम् ?

मनुष्यानां द्वे नेत्रे द्वौ हस्तौ स्तः अन्येषां प्राणिनां द्वे  नेत्रे विद्येते , हस्तौ न स्तः।

**ख)   उचितैः पदैः वाक्यानि पूरयत - -**

१।   ह्यः सायं पुत्रः पित्रा सह विपणिं ____ ।

ह्यः सायं पुत्रः पित्रा सह विपणिं अगच्छत् ।

२।   अहं श्वः प्रभाते स्वसुः गृहं ____ ।

अहं श्वः प्रभाते स्वसुः गृहं **गमिष्यामि**।

३.   येन वयं लिखामः सः ____ ।

येन वयं लिखामः सः हस्तः।

४.   येन वयं पुस्तकं धरामः  सः ____ ।

येन वयं पुस्तकं धरामः सः हस्तः।

५.   पक्षिणः पक्षाभ्यां नभसि ____ ।

पक्षिणः पक्षाभ्यां नभसि  **डयन्ते**।

**ग)  ' पठ ' धातोः परस्मैपदी लङ् रूपाणि - -**

| | | | |
|---|---|---|---|
| प्र. पु. | अपठत् | अपठतां | अपठन् |
| म. पु. | अपठः | अपठतं | अपठत |
| उ. पु. | अपठं | अपठाव | अपठाम |

घ) ' लङ् ' **(Imperfect past)** **रूपैः वाक्यानि पूरयत - -**

१। अहं ह्यः पाठं ______ (पठ्)

अहं ह्यः पाठं अपठम्।

२। मालिविका विणां ______ (वाद्)।

मालिविका विणां अवादयत् ।

३। गुरुः इमां कथां (कथ्)।

गुरुः इमां कथां अकथयत्।

४। जनाः (आगन् , आगच्छ्) ।

जनाः आगच्छन्।

शब्दसंग्रहः śabdasaṅgrahaḥ = Vocabulary

वाम हस्तः = *m* left hand

दक्षिणहस्तः = *m* right hand

अङ्गुली = Finger

दर्शय = *P.* (you) show

लिखामि = (I) write

उत्तिष्ठ = *P.* (You) stand up

पाणिः = *m* palm

विविधाः *a* = *f* various

रेखाः = *f* lines

स्पृश = *P.* (You) touch

प्रभातं = *n.* dawn, morning

धरामः = *P.* (We) hold